# N 782

Seat No. |  |

2025 II 27 1100 **-N 782-** SANSKRIT (27) (SECOND OR THIRD LANGUAGE) (SK)

(REVISED COURSE)

Time : 3 Hours (Pages 19) Max. Marks : 80

---

सूचना :

(1) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।


(2) यथासूचनम् आकलनकृतयः व्याकरणकृतयः आरेखितव्याः।

(3) आकृतीनाम् आलेखनं मसीलेखन्या कर्तव्यम्।

## प्रथमः विभागः—सुगमसंस्कृतम् 8

1\. (अ) चित्रं दृष्ट्वा नामानि लिखत। (5 तः 4) 4

(1)



(2)



(3)




(4)



(5)



P.T.O.

https://www.maharashtrastudy.com

(आ) सङ्ख्याः अक्षरैः/अङ्कैः लिखत। (3 तः 2)

(1) ३३

(2) ७५

(3) शतम्

(इ) समय-स्तम्भमेलनं कुरुत।

| 'अ' | 'आ' |
| --- | --- |
| (1) पञ्चाधिक-सप्तवादनम् | १.५० |
| (2) विंशत्यधिक-दशवादनम् | ११.०० |
| (3) एकादशवादनम् | १०.२० |
| (4) दशोन-द्विवादनम् | ७.०५ |

## द्वितीयः विभागः—गद्यम्

2. (अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।

प्रदोषकाले मृगमन्विष्यन् काकस्तत्रोपस्थितः। मृगं तथाविधं दृष्ट्वा स "सखे! किमेतत् ?" मृगेणोक्तम्, "सुहृद्वाक्यस्य अनादरात् बद्धोऽहम्। उव

सुहृदां हितकामानां यः शृणोति न भाषितम्।
विपत् सन्निहिता तस्य स नरः शत्रुनन्दनः॥"

https://www.maharashtrastudy.com

काकः अब्रूत, ''स वञ्चकः क्वास्ते ?'' मृगेणोक्तम्, ''मन्मांसार्थी तिष्ठत्यत्रैव।'' काकः उक्तवान्, ''उपायस्तावत् चिन्तनीयः।''

अथ प्रभाते क्षेत्रपतिर्लगुडहस्तः आगच्छन् काकेनावलोकितः। तमालोक्य काकेनोक्तम्, ''सखे मृग, त्वमात्मानं मृतवत्संदर्शय। वातेनोदरं पूरयित्वा पादान्स्तब्धीकृत्य तिष्ठ। यदाहं शब्दं करोमि तदा त्वमुत्थाय सत्वरं पलायिष्यसे।'' मृगस्तथैव स्थितः।

क्षेत्रपतिना मृगः आलोकितः उक्तञ्च, ''आः! स्वयं मृतोऽसि!'' सः मृगं बन्धनात् व्यमुञ्चत्। ततः काकशब्दं श्रुत्वा मृगः सत्वरं पलायितः। तमुद्दिश्य क्षेत्रपतिना क्षिप्तेन लगुडेन शृगालस्तावद् हतः।



(1) **अवबोधनम्। (4 तः 3)**

(क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत।

मृगः बद्धः यतः ......................।

(1) मृगेण सुहृद्वाक्यस्य अनादरः कृतः।

(2) मृगेण पाशः न दृष्टः।

(ख) कः कं वदति ?

''स वञ्चकः क्वास्ते ?''

(ग) अमरकोषात् शब्दं योजयित्वा वाक्यं पुनर्लिखत।

मृगमन्विष्यन् काकः तत्रोपस्थितः।

(घ) पूर्णवाक्येन उत्तरं लिखत।

काकेन कदा क्षेत्रपतिः अवलोकितः ?



https://www.maharashtrastudy.com

(2) **शब्दज्ञानम्। (3 तः 2)** 2

(क) गद्यांशात् 2 पूर्वकालवाचक-त्वान्त-अव्यये चित्वा लिखत।

(ख) सन्धिविग्रहं कुरुत।

उपायस्तावत् = ...................... + ................................।

(ग) प्रश्ननिर्माणं कुरुत।

काकः क्षेत्रे उपस्थितः।

(3) **पृथक्करणम्।** 2

क्रमेण योजयत।

(1) क्षेत्रपतिः मृगं व्यमुञ्चत्।

(2) क्षेत्रपतिना क्षिप्तेन लगुडेन शृगालः हतः।

(3) क्षेत्रपतिना मृगः आलोकितः।

(4) मृगः सत्वरं पलायितः।

**(आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** 7

भारतस्य दक्षिणदिशि केरलप्रदेशे आलुवा नगरस्य समीपं 'कालडि' नाम ग्रामः। सः ग्रामः पूर्णानदीतीरे वर्तते। तत्र जगद्गुरोः शङ्कराचार्यस्य जन्म ख्रिस्ताब्दे अष्टमे शतके अभवत्। तस्य पिता शिवगुरुः माता आर्याम्बा चास्ताम्। बाल्ये एव तस्य पिता शिवगुरुः दिवङ्गतः। तस्माद् मातैव पुत्रस्य पालनम् अकरोत्। पञ्चमे वयसि उपनीतः सः पठनार्थं गुरुमुपागच्छत्। तत्र वेद-वेदाङ्गानि, विविधशास्त्राणि च असाधारणवेगेन बालकोऽयम् अधीतवान्। पठनादिकं समाप्य शङ्करः गृहं प्रत्यागतवान्। गृहं प्राप्य मातृसेवाम् आरभत च। माता आर्याम्बा पुत्रस्य विवाहविषये सदैव चिन्तयति स्म परन्तु मनसा वचसा कर्मणा च विरक्तः शङ्करः संन्यासार्थम् अनुमतिं प्रार्थयत। शङ्करस्य ऐहिकविषयेषु अरुचिं दृष्ट्वा आर्याम्बा चिन्तामग्ना जाता।

https://www.maharashtrastudy.com

(1) **अवबोधनम्। (4 तः 3)** 3

(क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।

(1) .................. वयसि उपनीतः सः पठनार्थं गुरुम् उपागच्छत्।

(पञ्चमे/दशमे)

(2) पठनादिकं समाप्य शङ्करः .................. प्रत्यागतवान्।

(नदीं/गृहं)

(ख) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत।

जगद्गुरोः शङ्कराचार्यस्य जन्म ख्रिस्ताब्दे सप्तमे शतके अभवत्।

(ग) पूर्णवाक्येन उत्तरं लिखत।

का शङ्कराचार्यस्य माता ?

(घ) एषः गद्यांशः कस्मात् पाठात् उद्धृतः ?

(2) **शब्दज्ञानम्। (3 तः 2)** 2

(क) गद्यांशात् 2 पूर्वकालवाचक-ल्यबन्त-अव्यये चित्वा लिखत।

(ख) प्रश्ननिर्माणं कुरुत।

सः <u>पठनार्थं</u> गुरुमुपागच्छत्।

(ग) लकारं लिखत।


सः ग्रामः पूर्णानदीतीरे <u>वर्तते</u>।



https://www.maharashtrastudy.com

(3) **पृथक्करणम्।** 2

शब्दपेटिकां पूरयत।



(कालडिग्राम:, केरलप्रदेश:, भारतदेश:, आलुवानगरम्)

**(इ) गद्यांशं पठित्वा माध्यमभाषया सरलार्थं लिखत। (2 त: 1)** 4

(1)

रदनिका – (सनिर्वेदं नि:श्वस्य) जात! कुतोऽस्माकं सुवर्णव्यवहार: ? तातस्य पुनरपि ऋद्धया सुवर्णशकटिकया क्रीडिष्यसि। (स्वगतम्) तद्यावद्विनोदयाम्येनम्। आर्यावसन्तसेनाया: समीपमुपसर्पिष्यामि। (उपसृत्य) आर्ये! प्रणमामि।

वसन्तसेना – रदनिके! स्वागतं ते। कस्य पुनरयं दारक: ? अनलङ्कृतशरीरोऽपि चन्द्रमुख आनन्दयति मम हृदयम्।

https://www.maharashtrastudy.com

(2)

| | |
|---|---|
| नदी (विपाट्) | – किम् ? एषः मर्त्यः मां मात्ता इति सम्बोधयति ? |
| नदी (शुतुद्री) | – कथं माता न करोति साहाय्यं स्वपुत्रस्य ? साधु मानवश्रेष्ठ साधु! किन्तु, कच्चित् तव वंशजाः मनुजाः तवेदं वचनं विस्मरिष्यन्ति ? |
| विश्वामित्र | – न हि मातः, नैतत् शक्यम्। सर्वाः सरितः सुखं वहन्तु। सर्वे जनाः सुखिनः सन्तु॥ (विश्वामित्रः निर्गच्छति।) |
| कीर्तनकारः | – एवं विश्वामित्रः नद्यौ प्रीणयित्वा परतीरं गतवान्। |

**(ई) माध्यमभाषया उत्तरं लिखत। (2 तः 1)** 2

(अ) सुदासः सुगतचरणाभ्यां कमलं किमर्थं समर्पितवान् ?

(ब) महर्षिः कणादः परमाणुविषये किं प्रतिपादितवान् ?

## तृतीयः विभागः–पद्यम्

18

**3. (अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** 4

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः॥

P.T.O.

https://www.maharashtrastudy.com

| |
|---|
| सा तदा करुणा वाचो विलपन्ती सुदु:खिता।<br>वनस्पतिगतं गृध्रं ददर्शायतलोचना॥<br>अयं न भक्तो न च पूजको वा<br>घण्टां स्वयं नादयते तथापि।<br>धनं जनेभ्य: किल याचतेऽयं<br>न याचको वा न च निर्धनो वा॥ |

(1) **पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत। (3 त: 2)** 2

(क) **पूर्णवाक्येन उत्तरं लिखत।**

'अयं न भक्तो' इति प्रहेलिकाया: उत्तरं किम् ?

(ख) **विशेषण-विशेष्ययो: मेलनं कुरुत।**

| | विशेषणम् | | विशेष्यम् |
|---|---|---|---|
| (1) | वनस्पतिगत: | — | सीता |
| (2) | आयतलोचना | — | रावण: |
| | | — | गृध्र: |

(ग) **पूर्वपदं लिखत।**

(1) मरणमस्तु = .......................... + अस्तु।

(2) याचतेऽयम् = .......................... + अयम्।

https://www.maharashtrastudy.com

(2) मञ्जूषातः उचितं शब्दं चित्वा स्तम्भपूरणं कुरुत।

| | | | |
|---|---|---|---|
| नीतिनिपुणाः | ................ | ................ | वा |
| ................ | अद्यैव | ................ | वा |

(मञ्जूषा – मरणम्, निन्दन्तु, युगान्तरे, स्तुवन्तु)

(आ) माध्यमभाषया उत्तरं लिखत। (2 तः 1)

(1) 'क्रियासिद्धिः सत्त्वे भवति' इति सूर्यस्य उदाहरणेन स्पष्टीकुरुत।

(2) 'यथा चतुर्भिः' इति श्लोकस्य स्पष्टीकरणं कुरुत।

(इ) पद्ये शुद्धे पूर्णे च लिखत। (क, ख तः 1, ग, घ तः 1)

(1) (क) कं संजघान ................................ शीतम्॥

अथवा

(ख) यदा किञ्चिज्ज्ञोऽहं ........................ व्यपगतः॥

(2) (ग) तावद् भयाद्धि ........................ यथोचितम्॥

अथवा

(घ) राक्षसेभ्यः ................................ स पण्डितः॥

(ई) अन्वयं पूरयत।

अल्पानां ........................ अपि संहतिः ........................ (1

यथा (गुणत्वम्) ........................ तृणैः ........................ बध्यन्ते॥

https://www.maharashtrastudy.com

(उ) **पद्यांशं पठित्वा माध्यमभाषया सरलार्थं लिखत। (3 तः 2)** 4

(1) वाचनं ज्ञानदं बाल्ये तारुण्ये शीलरक्षकम्।

वार्धक्ये दुःखहरणं हितं सद्ग्रन्थवाचनम्॥

(2) वृथाभ्रमणकुक्रीडापरपीडापभाषणैः।

कालक्षेपो न कर्तव्यो विद्यार्थी वाचनं श्रयेत्॥

(3) यथैव सकला नद्यः प्रविशन्ति महोदधिम्।

तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः॥

## चतुर्थः विभागः—लेखनकौशलम् 9

4. (अ) **धातूनाम् अव्ययानां च विशिष्टविभक्तेः उपयोगं कृत्वा वाक्यनिर्माणं कुरुत। (6 तः 4)** 4

(क) बहिः

(ख) वामतः

(ग) सह

(घ) स्निह्

(च) प्रति + श्रु (५ प. प.)

(छ) गम् - गच्छ् (१ प. प.)

https://www.maharashtrastudy.com

अथवा

संस्कृतानुवादं कुरुत। (6 तः 4) 4

(1) मासे पाण्यात राहतात.

मछलियाँ पानी में रहती हैं।

Fish live in water.

(2) झाडे पर्यावरणाचे रक्षण करतात.

पेड़ पर्यावरण का रक्षण करते हैं।

Trees protect environment.

(3) गायक गीत गातो.

गायक गीत गाता है।

A singer sings a song.

(4) कृपया मला पिशवी दे.

कृपया मुझे थैली दो।

Please give me a bag.

(5) माणसाने नेहमी खरे बोलावे.

इन्सान को हमेशा सच बोलना चाहिए।

A man should always speak truth.

(6) (दोन) सिंह गर्जना करतात.

(दो) सिंह गर्जना करते हैं।

(Two) lions roar.



https://www.maharashtrastudy.com

(आ) 5/7 वाक्यात्मकं निबन्धं लिखत। (3 तः 1) 5


(1) मम प्रियः कविः।

(2) मम प्रियः नेता।

(3) मम प्रिया भाषा।

अथवा

साहाय्यक-शब्दानाम् आधारेण 5/7 वाक्यात्मकं चित्रवर्णनं कुरुत। 5




(भ्रमति, लिखति, अस्ति, उत्तरति, दृश्यते, पृच्छति, पठति)

https://www.maharashtrastudy.com

# पञ्चमः विभागः—भाषाभ्यासः



5. (अ) तालिकापूर्तिं कुरुत। 8

(1) नामतालिका। (6 तः 4) 2

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| .................. | कव्योः | ............... | सप्तमी |
| .................. | ................ | शशिभ्यः | पञ्चमी |
| मरुते | ................ | .............. | चतुर्थी |

(2) सर्वनामतालिका। (6 तः 4) 2

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| .................. | .................. | आभिः | तृतीया |
| .................. | तौ | .................. | द्वितीया |
| अहम् | .................. | .................. | प्रथमा |

(3) क्रियापदतालिका। (6 तः 4) 2

| लकारः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|---|
| लोट् | कथयतु | .............. | .............. | प्रथमः |
| लङ् | .............. | .............. | अविद्यध्वम् | मध्यमः |
| लृट् | .............. | गमिष्यावः | .............. | उत्तमः |

P.T.O.

https://www.maharashtrastudy.com

(4) **धातुसाधित-विशेषण-तालिका। (6 तः 4)** 2

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| मुच्-मुञ्च् (6 प.प.) | ............... | मुक्तवान् | मोचनीयः | ............... |
| वन्द् (1 आ.प.) | वन्दितः | ............... | वन्दनीयः | ............... |
| कृ (8 उ.प.) | ............... | कृतवान् | ............... | कुर्वाणः/कुर्वन् |

**(आ) निर्दिष्टाः कृतीः कुरुत। (4 तः 3)** 9

(1) **योग्यं रूपं लिखित्वा रिक्तस्थानपूर्तिं कुरुत। (5 तः 3)** 3

(क) .............................. (4) वेदाः वर्तन्ते।

(सङ्ख्यावाचकम्)

(ख) दिनस्य ...................... (9) लोकयानम् आगच्छति।

(आवृत्तिवाचकम्)

(ग) भवने मम गृहं ...................... (7) तले वर्तते।

(क्रमवाचकम्)

(घ) माता .................................. (5) मम युतकं प्रक्षालितवती।

(आवृत्तिवाचकम्)

(च) सेवकः मञ्चे ............... (3) आसनानि स्थापितवान्।

(सङ्ख्यावाचकम्)

https://www.maharashtrastudy.com

(2) समासानां तालिकापूर्तिं कुरुत। (5 तः 3) 3

| | समस्तपदम् | विग्रहः | समासनाम |
|---|---|---|---|
| (क) | खगोत्तमः | .................... | सप्तमी-तत्पुरुषः। |
| (ख) | अल्पधीः | अल्पा धीः यस्य सः। | .................... |
| (ग) | सविनयम् | .................... | अव्ययीभावः। |
| (घ) | .............. | महत् काव्यम्। | कर्मधारयः। |
| (च) | .............. | पशूनां पतिः। | षष्ठी-तत्पुरुषः। |

(3) समानार्थकशब्दान्/विरुद्धार्थकशब्दान् लिखत। (5 तः 3) 3

(क) कनकम् = .................................... ।

(ख) क्रेतुम् × .................................... ।

(ग) कर्षकः = .................................... ।

(घ) विदेशः × .................................... ।

(च) गृहम् = .................................... ।



https://www.maharashtrastudy.com

(4) **सूचनानुसारं कृतीः कुरुत। (5 तः 3)**

(क) पदवी अपि प्राप्ता मया।

(वाच्यपरिवर्तनं कुरुत।)

(ख) अर्णवः जपाकुसुमं गृहीत्वा प्रविशति।

(पूर्वकालवाचकम् अव्ययं निष्कासयत।)

(ग) शिशिरऋतौ पद्मं व्यकसत्। https://www.maharashtrastudy.com

(वाक्यं बहुवचने लिखत।)

(घ) त्वं धनुः त्यज। ('त्वं' स्थाने 'भवान्' योजयत।)

(च) मेघः सन्देशं नयति। (यक्षः) (णिजन्तं कुरुत।)

## षष्ठः विभागः—अपठितम् 8

6. (अ) **गद्यांशं पठित्वा कृतीः कुरुत। (6 तः 4)** 4

सुन्दरपुरं नाम किमपि नगरम् आसीत्। तत्र सुधीरः नाम बालः प्रतिवसति स्म। अष्टम्यां कक्षायां स पठति स्म। सः अतीव चतुरः धीरः च। तस्य अध्यापकाः

https://www.maharashtrastudy.com

मित्राणि च तं नित्यं प्रशंसन्ति स्म। तस्य जनक: रक्षक: आसीत:। स: अपि स्वजनक: इव निर्भय: साहसप्रिय: च आसीत्। एकदा क: अपि चोर: नगरम् आगत:। स: बालकान् अपहरति स्म। तान् बालकान् अन्ये स्थाने न्यस्यति। तेषां जनकेभ्य: प्रभूतं धनं लभते।

(1) **पूर्णवाक्येन उत्तरं लिखत।**

सुन्दरपुर-नगरे क: प्रतिवसति स्म ?

(2) **प्रातिपदिकं लिखत।**

(क) मित्राणि

(ख) तस्य

(3) **वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत।**

तस्य जनक: शिक्षक: आसीत्।

(4) **माध्यमभाषया सरलार्थं लिखत।**

स: अतीव चतुर: धीर: च।

P.T.O.

https://www.maharashtrastudy.com

(5) सप्तम्यन्तपदं चिनुत लिखत च।

(6) **कारकपरिचयं कुरुत।**

स: <u>बालकान्</u> अपहरति स्म।

**(आ) (1) पद्यांशं पठित्वा निर्दिष्टे कृतीः कुरुत।**

दिनान्ते च पिबेत् दुग्धं, निशान्ते च पिबेत् जलम्।

भोजनान्ते पिबेत् तक्रं, किं वैद्यस्य प्रयोजनम्॥

(क) **पूर्णवाक्येन उत्तरत। (2 तः 1)**

(1) दिनान्ते किं पिबेत् ?

(2) तक्रं कदा पिबेत् ?

(ख) **समानार्थकं शब्दं लिखत।**


निशा = ........................................।

https://www.maharashtrastudy.com

(2) **पद्यांशं पठित्वा जालरेखाचित्रं पूरयत।** 2

पक्षिणां बलम् आकाशं मत्स्यानाम् उदकं बलम्।

दुर्बलस्य बलं राजा बालानां रोदनं बलम्॥




https://www.maharashtrastudy.com